# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तृतीया परीक्षा – प्रथमपत्रिका

दिनाङ्कः – 30–08–2020 | प्रातः 10:00 तः 1:00 पर्यन्तम्

समयः – होरात्रयम् | अङ्काः – 100

1. पञ्चानां प्रश्नानां संस्कृते एकवाक्येन उत्तरं लिखत । 5

   1. काञ्चनमाला का ?
   2. वृक्षच्छायायां प्रसुप्तः ब्राह्मणः किम् अपश्यत् ?
   3. सुमतिः कस्य अमात्यः ?
   4. व्याधः कथम् आसीत् ?
   5. मलयालदेशस्य राजा कः ?
   6. तारकेण विप्रकृताः देवाः कुत्र ययुः ?

2. षण्णां प्रश्नानाम् उत्तरं द्वित्रैः वाक्यैः संस्कृते लिखत । 12

   1. नव गोप्यानि कानि ?
   2. शुकशावकौ कुत्र न्यवसताम् ? तयोः नाम किमासीत् ?
   3. गणेशं के नमस्कुर्वन्ति ? कदा नमस्कुर्वन्ति ?
   4. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किम् चिन्तितवान् ?
   5. आर्यः अनार्यः च कथं पततः ?
   6. द्रोणः एकलव्यं शिक्षयितुम् अनिच्छन् किमवदत् ?
   7. पञ्चतन्त्रं केन लिखितम् ? पञ्चतन्त्राणि कानि ?

3. त्रयाणां प्रश्नानाम् उत्तरं पञ्चषैः वाक्यैः संस्कृते लिखत । 9

   1. गृहिणी द्विजं किमवदत् ?
   2. मल्लस्य सामर्थ्यं विशदयत ।
   3. चित्रग्रीवः कः ? स स्वाश्रितान् कथं ररक्ष ?
   4. श्रीशङ्कराचार्यः कुत्र कदा अवततार? तस्य पितरौ कौ? तस्य प्रसिद्धाः शिष्याः के ?

4. चतुर्णां प्रश्नानाम् उत्तरं दशभिः वाक्यैः मातृभाषया लिखत । 12

1. किमर्थं सर्वेऽपि कवयः कालिदासमेव कविचक्रवर्तिनम् अमन्यन्त? विवृणुत ।
2. 'पञ्चतन्त्रकथामुखम्' इति पाठस्य सारांशं लिखत ।
3. 'पतिव्रतायाः माहात्म्यम्' इति पाठं विशदयत ।
4. ब्राह्मणः सर्पश्च इति कथां सङ्गृह्य लिखत ।
5. देवैः कृतं ब्रह्मणः स्तुतिं पाठोक्तरीत्या विशदयत ।

5. चतुर्णां सन्दर्भं मातृभाषया विवृणुत ।

1. सर्वथा अविचार्य कर्म न कर्तव्यम् ।
2. तत्र भवद्भिः सन्निहितैः भवितव्यम् ।
3. जरारोगवर्जितो वज्रकायो भविष्यति ।
4. अतिथिसत्कारः श्रेयस्करः ।
5. न हि किञ्चित् गुरवे अदेयम् ।

6. द्वयोः अन्वयानुसारम् अर्थम् मातृभाषया लिखत ।

1. अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् ।
   वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥

2. रक्षादीपितलाङ्गूलः स तु लङ्कामशेषतः
   दग्ध्वा सागरमुत्तीर्य वानरान् समुपागमत् ॥

3. अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
   तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः ॥

7. श्लोकद्वयं पूरयत । 4

1. रविनिशाकरयोः_________मे मतिः ॥
2. शान्ताकारं________नाथम् ॥
3. निन्दन्तु __________ न धीराः ॥

16. लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत । ( द्वे एव ) 4

1. प्रक्षालनात् _________ वरम् । 2. क्लेशः _________ विधत्ते ।

3. उद्योगिनं __________ लक्ष्मीः ॥

17. संयोज्य लिखत । 4

| अ | आ |
|---|---|
| 1. नमति | अ) कर्मणि |
| 2. नमस्ते | आ) कृदन्तः |
| 3. नम्यते | इ) सकारादेशः |
| 4. नमोऽस्तु | ई) परस्मैपदि |
| | उ) उकारादेशः |

18. व्याकरणविशेषं लिखत । 2

1. विषादं मा कृथाः 2. कपोतराजः

19. रेखाङ्कितपदमाधृत्य प्रश्नवाक्यं रचयत । 2

1. ***गतक्रोधः*** कौशिकः मिथिलानगरीम् अगच्छत् ।

2. अस्मिन् ग्रन्थे ***पञ्च*** तन्त्राणि सन्ति ।

20. समूहेतरपदं पृथक् कृत्वा लिखत । 2

1. पठति, भवति, वियति, वन्दते ।

2. बहुशक्तिः, उग्रशक्तिः, अमरशक्तिः, अनन्तशक्तिः ।

21. चतुर्थं पदं लिखत । 2

1. राजा – घृणी :: ब्राह्मणः -------।

2. रामः – साधवे :: दुर्मुखः -------।

22. प्रयोगपरिवर्तनं कुरुत । 2

1. त्वया लिख्यताम् दिवसः । 2. नाहं विद्याविक्रयं करोमि ।

* * *

# श्रीसुरसरस्वतीसभा , शृङ्गेरी
## तृतीया परीक्षा – द्वितीयपत्रिका

दिनाङ्कः – 30–08–2020 अपराह्णः 1:30तः 3:00 पर्यन्तम्

समयः – सार्धैकहोरा अङ्काः – 50

1. अ) दशभिः वाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत । 5

1. शुनकः 2. मम शाला 3. आदिकाव्यम्

आ) संस्कृतभाषया पत्रमेकं लिखत । 5

1. शालावार्षिकोत्सवम् आगन्तुं मित्रं प्रति पत्रं लिखत ।
2. अनारोग्यकारणं संसूच्य मुख्योपाध्यापकं प्रति विरामपत्रं लिखत ।

2. द्वयोः लक्षणं सोदाहरणम् आङ्ग्लभाषया कर्नाटकभाषया वा लिखत । 6

1. कर्मणि प्रयोगः 2. शतृप्रत्ययः 3. रेफादेशविसर्गसन्धिः

3. त्रिषु पुरुषवचनेषु लिखत । ( द्वयोः एव ) 6

1. स्यात् 2. अब्रवीत् 3. अमोदत

4. एकस्य शब्दस्य रूपाणि सर्वविभक्तिवचनेषु लिखत । 4

1. भवत् ( पुल्लिंगे) 2. अस्मद् 3. नदी

5. वाक्यदोषान् परिहरत । 3

1. गङ्गानदी हिमालये प्रभवति ।
2. रामस्य आम्रफलं रोचते ।
3. सः बालकः त्रयः पुस्तकानि अपठत् ।

6. प्रयोगपरिवर्तनं कुरुत । 3

1. तेन पूजा न कृता ।
2. पुत्रः क्षीरं ददाति ।
3. बालकः देवान् नमति ।

7. वाक्ये विद्यमानं कृदन्तं चित्वा नाम लिखत । 3

1. यूयं सर्वे सम्भूय विनायकस्य उत्सवम् आचरत ।
2. पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा चानृणी भवेत् ।
3. बालकः ग्रन्थालये कथाम् अधीतवान् ।

8. त्रयाणां अन्यलिङ्गरूपं लिखत । 3

1. कविः 2. भार्या 3. राजा

9. वाक्यमेकं कर्नाटकभाषया आङ्ग्लभाषया वा विवृणुत । 2

1. चिन्तासमं नास्ति शरीरशोषणम् ।
2. अल्पविद्यः महागर्वी ।

10. अनुवादं कुरुत । 5

1. ನಾವು ಈ ದಿನ ಚಲನಚಿತ್ರವನ್ನು ನೋಡೋಣ. Let us see the movie today.
2. ಒಮ್ಮೆ ನಾನು ಕಾಡಿನಲ್ಲಿ ಹುಲಿಯನ್ನು ನೋಡಿದೆನು. Once I saw a tiger in the forest.
3. ವಿಷ್ಣುವು ಆನೆಯನ್ನು ಮೊಸಳೆಯಿಂದ ರಕ್ಷಿಸಿದನು.
   Lord Vishnu protected the elephant from the crocodile.
4. ಸಾಯಂಕಾಲ ಪೂರ್ವದಿಕ್ಕಿನಲ್ಲಿ ಚಂದ್ರನು ನೋಡಲ್ಪಟ್ಟನು.
   In the evening the Moon was seen in the eastern direction.
5. ಹುಡುಗಿಯರಿಬ್ಬರು ಪದ್ಯಗಳೆರಡನ್ನು ಬರೆಯುತ್ತಾರೆ. The two girls write two poems.

11. संस्कृतभाषया अनुवादं कुरुत । 5

1. रोगिणे औषधानि फलानि च यच्छन् सः पुण्यम् आर्जयति ।
2. श्वः मेघः वर्षिष्यति न वा को वा ज्ञास्यति ।
3. एधमानं सस्यं अङ्कुरावस्थायामेव जानन्ति कुशलाः ।
4. योधाः शत्रून् विजित्य राजधानीं रक्षितवन्तः ।
5. कर्मकराः कार्याणि कृत्वा कार्यालयात् निरगच्छन् ।

* * *